श्रीः ।

श्रीमते रामानन्दाय नमः ।

श्रीमद्रामानन्दीय हरिहरप्रसादविरचितम्

श्रीरामतत्त्वभास्कर-
श्रीरामलीलातत्त्वभास्कर-
नामतत्त्वभास्कराख्यग्रन्थत्रयम्

श्रीमदयोध्याशृङ्गारभवननिवासिना-

श्रीभगवन्नारायणवंशोद्भव

वैष्णव पं॰ रामनारायणदासेन संशोध्य

ग्रन्थकारप्रधानशिष्य-

श्रीयुत प्रमोदवनविहारिशरणाज्ञया

तद्दत्तद्रव्यव्ययेन च

मुरादाबादनगरे

लक्ष्मीनारायण यन्त्रालये

आयसाक्षरैर्मुद्रापयित्वा

प्रकाशितम्

प्रथमावृत्तिः १०००, सं॰ १९७२

Printed by Lakshmi Narayan
at the Lakshmi Narayan Press,
Moradabad.

श्रीरामतत्त्वभास्करस्य पूर्वार्द्धविषयसूची ।

विषय	पृष्ठ पंक्ति
मंगलाचरणम्	१—७
चार्वाकादिमतमुत्थाप्य तत्खण्डनम्	२—९
तेषां प्रलापान्तरमुद्भाव्य तत्खण्डनम्	३—१६
अपरं प्रलापान्तरमुद्भाव्य तत्खण्डनम्	६—२०
पुनरपरंप्रलापान्तरमुद्भाव्य तत्खण्डनम्	७—३
पुत्रात्मवादिमतमुत्थाप्य तत्खण्डनम्	१३—७
इन्द्रियात्मवादिचार्वाकमतम्	१३—१०
प्राणात्मवादि चार्वाकमतम्	१४—५
मनआत्मवादि चार्वाकमतम्	१४—११
बुद्ध्यात्मवादि चार्वाकमतम्	१४—१८
अज्ञानात्मवादिचार्वाकमतम्	१५—३
अज्ञानोपहितचिदात्मवादिचार्वाकमतम्	१५—११
शून्यात्मवादिमतम्	१६—७
शून्यवादखण्डनम्	१६—१६
अद्वैतमतमुत्थाप्य विविधप्रकारैः खण्डनम्	१७—७

उत्तरार्द्धविषयसूची ।

विषय	पृष्ठ पंक्ति
मंगलाचरणम्	२५—४
श्रीरामस्यपुष्टप्रमाणैः पौरुषेऽप्रतिद्वंद्वत्व, महापुरुषत्व, क्लेशवर्जितत्व, नित्यत्व, जगद्गुरुत्व समर्थनम्	२५—७
वशित्व, प्रभुत्व महोत्कर्षत्व, महाबलत्व, नरत्व, सादृश्यरहितत्व समर्थनम्	२८—६
ईश्वरेषत्व शिवोपास्यत्व, परात्परत्व, जगज्जन्मादिहेतुत्वसमर्थनं	२९-११
श्रीरामस्य महाविष्णु महेशान-	
शिव नारायण हरि वासुदेव नाम्नां समर्थनम्	३९—११
प्रसंगतःनारायणमंत्रार्थ कथनं	४३—१९
प्रसंगतःवासुदेवमन्त्रमाहात्म्यं	४६—१
वासुदेवनिरुक्तिः	४९—१३
श्रीरामस्य सूर्यमंडलमध्यवर्त्तित्व, द्विभुजत्व, रघुनन्दत्व, सर्वेश्वरत्व, प्रसन्नात्मत्वसमर्थनम्	५०—११
अन्येषांविभूतित्वेनप्रतिपादनम्	५१—४
प्रसंगतः षडक्षरमाहात्म्यम्	५७—७
ग्रन्थान्ते मंगलाचरणम्	५८—१३

अथ नामतत्त्वभास्करस्य विषयसूची ।

विषय	पृष्ठ पंक्ति
मंगलाचरणम्	६३—४
श्रीविष्णुनाममाहात्म्यम्	६३—८
श्रीनारायणनाममाहात्म्यम्	६५—३
श्रीहरिनाममाहात्म्यम्	६६—८
श्रीगोविन्दनाममाहात्म्यम्	७०—१४
श्रीवासुदेवनाममाहात्म्यम्	७२—४
श्रीजगन्नाथनाममाहात्म्यम्	७२—१६
श्रीकृष्णनाममाहात्म्यम्	७३—३
श्रीरामनाममाहात्म्यम्	७५—११
श्रीसर्वसाधारणभगवन्नाममाहात्म्यम्	७७—१३
श्रीभगवन्नामार्थवादकल्पनादूषणं	७८-७
अथ नामापराधाः	७८—२१
अथ नामापराधभंजनम्	८१—१
पुनश्चनाममाहात्म्यम्	८२—१२
सेतिहासरामनामप्रभावः	८३—५
पुनश्चरामनाममाहात्म्यम्	९२—७
श्रीशब्दपूर्वजयशब्दमध्यजयद्वयान्तरितरामनामोच्चारणमाहात्म्यम्	९१—१४
रामनामोच्चारणे देशकालादिनियमाभावः	९३--१९
पुनश्चनामकीर्त्तनमाहात्म्यम्	९३-२४
तत्तत्कालेतत्तद्भगवन्नामोच्चारणम्	९५—१५
श्रीरामनामतुसर्वकर्मणि	९५-२४

श्रीगणेशाय नमः । श्रीमते रामानन्दाय नमः ।
श्रीसीतारामाभ्यां नमः ॥

श्रीरामतत्त्वभास्करे पूर्वार्द्धं

प्रारम्भम्

ग्रन्थारम्भे विघ्नविघातार्थ कृतं मंगलं शिष्टाचारप्रदर्शनाय ग्रन्थादौ निबध्नाति । तथा च सांख्ये कपिलः मङ्गलाचरणं शिष्टाचारात् ॥ कर्त्ता सर्वस्य लोकस्य पालकश्च नियामकः । वेदानां रक्षको यश्च तं रामं प्रणमाम्यहम् ॥ १ ॥ तं राममहं प्रणमामि यः सर्वस्य लोकस्य कर्त्ता पालकः चात् संहारकः । तथाच श्रुतिः-यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्वतद्ब्रह्मेति ॥ नियामकः तथा च श्रुतिः स एवैनं साधुकर्म्म कारयति यमूर्द्ध्वन्निनीषति स एवैनं नियमयति ॥ वेदानां रक्षकः वेदरक्षकत्वं चास्य स्वांशमत्स्यावतारद्वारा पुराणादिप्रसिद्धम् ॥ चात् दयालुः ॥ १॥ जामदग्न्यनियन्तारं जावालिमतखंडकम् । शूद्रतापसहन्तारं तं रामं प्रणमाम्यहम् ॥ २॥ परशुरामस्य नियन्तारमौद्धत्यशान्तिकारकम् ॥ स्वांशत्वेऽपि परशुरामशक्तिखंडनवत् बुद्धस्यापि

मतखंडनशक्तिरस्यास्तीति तल्लाभायेदम् ॥ जावालिमतखंडकं चार्वाकादिमतखंडनशक्तिलाभायेदम्॥ शूद्रः स्वधर्ममतिक्रम्य तपश्चरणशीलस्तस्य हन्तारम् विरुद्धाचारप्रशमनशक्तिलाभायेदम् ॥२॥ पुनरपि उद्धृतरिपुहस्तपतनमाशंक्य प्रभुं प्रार्थयते

रक्ष रक्ष रघुनन्दन श्रुतिपथपाल ॥ पाहि पाहि करुणाकर दुर्जनकाल॥३॥

चार्वाकादिमतापसारणमन्तरेण निःश्रेयसं दुर्लभमिति तस्य चापसारणन्तद्विज्ञानं विना न संभवति अतःप्रथमं तन्मतमुत्थाप्य खंडयति ॥

दर्शनाद्व्यभिचाराणामनुमानं नहि प्रमा प्रत्यक्षस्यैव प्रामाण्यं जीवाद्भिन्नो बुधो नहि ॥ ४ ॥

अनुमानं नहि प्रमा अनुमानं न प्रमाणं,येनैव हेतुना प्रमीयते तेनैव भ्राम्यते। यथा पर्वते धूमेन वह्निः ह्रदेऽपि तथेति भावःप्रत्यक्षस्यैव प्रामाण्यं व्यभिचाराभावात् जीवाद्भिन्नो बुधो नहि वृहस्पतेर्भिन्नो ज्ञानवान्कश्चिन्नास्तीति तन्मतमेवानुसरणीयमिति भावः॥४॥

एवं मा वद रेमूढानुमानं न प्रमायतः ॥ सन्देहादेरविज्ञानाच्छ्ववेवल्लोके भविष्यसि ॥ ५ ॥

रेमूढ अनुमानं न प्रमा न प्रमाणमेवं वाक्यं मा वद। यतः यस्मात्परपुरुषहृदयवर्त्तिसंदेहादेः संदेहशोकक्रोधभयादेरविज्ञानात् श्वा इव कुक्कुरवल्लोके भवि-

ष्यसि अयं भावः । अनिश्चितार्थवचनेन संदेहज्ञानं मुखवैवर्ण्याच्छोकज्ञानं, नेत्रमुखादिरक्तत्वेन क्रोधज्ञानं मुखपीतत्वेन भयज्ञानम् । एतानि ज्ञानान्यनुमानं विना ज्ञातुं न शक्यते, यद्यनुमानं न मन्यसे तर्हि संदेहादियुक्तपुरुषेण सह हास्यादिकरणेन श्वा इव तेन निरादरणीयो भविष्यसि । यद्वा श्ववल्लोके भविष्यसि चार्वाकोति मूढतम इति जना वदिष्यन्ति यतो यैरिन्द्रियैःप्रत्यक्षं क्रियते तान्यप्रत्यक्षाणि तेषां ज्ञानमनुमानं विना नैव जायते अतोऽनुमानस्यापि प्रामाण्यम् । तथाच चरके सूत्रस्थाने भगवान् पतञ्जलिः । यैरेव तावदिन्द्रियैः प्रत्यक्षमुपलभ्यते तानि सन्ति चाप्रत्यक्षाणि यद्वा अनुमानखण्डनस्याप्यनुमानरूपत्वादित्यविचारितार्थवचनेन श्ववल्लोके भविष्यसि । यद्वा चार्वाकस्य गृहाद्बहिर्गमनमात्रेण तत्पत्नी तदप्रत्यक्षमवगम्य कथं न विधवावेषं रोदनादिकं च करोतीत्युपहासेन श्ववल्लोके भविष्यसि ॥ ५ ॥ प्रलापान्तरमुद्भावयति । मृतानामपि जन्तूनां श्राद्धञ्चेत्तृप्तिकारकम् । गच्छतामिह जन्तूनाम्व्यर्थं पाथेयकल्पनम् ॥ ६ ॥ जन्तूनाम्प्राणिनाम् व्यर्थं पाथेयकल्पनम्, तत्समीपे पाथेयदानं व्यर्थं स्यात् । गृहेषु स्थित्वैव मन्त्रादिना तदुद्देश्यकदानेन तृप्तिसंभवात् ॥ ६ ॥

युक्त्यन्तरेणेममेवार्थं दृढयति स्वर्गस्थिता यदा तृप्तिं गच्छेयुस्तत्र दानतः प्रासादस्योपरिस्थानामत्र कस्मान्न दीयते ॥७॥ तत्र स्वर्गे अत्र लोके नीचस्थैरिति शेषः ॥ ७ ॥ युक्त्या श्राद्धादेः सुखहेतुत्वं संस्थापयति। एवं मा वद मूढात्मन्निह भूपादिपत्रवत्। स्वस्वस्थानेऽर्पयेदिष्टन्निदेशः परमेशितुः ॥८॥ मूढात्मन् एवं मा वद कुत इत्यपेक्षायामाह स्वस्वेति परमेशितुः परमेश्वरस्य निदेशो वेदादिरूपः स्वस्वस्थाने स्वर्गकामो यजेतेत्यादिना निरूपिते पृथक् पृथक्स्थाने इष्टं अभिलषितार्थजातम् । अर्पयेत् नत्वन्यत्र दृष्टान्ते न दृढयति। इह लोके भूपादिपत्रं लिखितप्रदेशे यथाफलं ददाति ॥८॥ भस्मीभूतस्य देहस्य पुनरागमनं कुतः। एवम्मा वद बालानां स्तन्यपानादि दर्शनात् ॥ ९ ॥ एवमुत्पादविनाशशालिदेह एवात्मेतिप्रकारम्मा वद कुत इत्यपेक्षायाम्बालानामिति बालानां सद्यो जातानां पूर्वं केनाप्यनुपदिष्टानां स्तन्यपानादिदर्शनात् । स्तने भवं स्तन्यं दुग्धं तस्य पानम्। आदिशब्देन सद्यो जात वा नरशिशोः शाखावलम्बनस्य व्याघ्रशिशोः प्राणहिंसनव्यापारस्य च दर्शनात्। जन्मान्तरम्विना न संभवति अज्ञातत्वादिति भावः । तथा

च चरके सूत्रस्थाने भगवानपलङ्जलिः ॥ धर्मद्वारा-
वहितेश्च व्यपगतभयरागद्वेषलोभमोहमानैर्ब्रह्मचर्य-
परैराप्तैः कर्मविद्भिरनुपहतसत्त्वबुद्धिप्रचारैः पूर्वैः-
पूर्वतरैश्च महर्षिभिर्दिव्यचक्षुर्भिर्दिष्टोपदिष्टः पुन-
र्भवोऽस्तीति व्यवस्येदेवं पुनर्भवं प्रत्यक्षमपि चोप-
लभ्यते। मातापित्रोर्विसदृशान्यपत्यानि तुल्यगुणसं-
भवानि च वर्णस्वराकृतिसत्त्वबुद्धिभाग्यविशेषाः प्रवरा-
वरकुलजन्मदास्यैश्वर्यसुखासुखमायुरायुषो वैषम्य-
मिहाकृतस्य चावाप्तिरशिक्षितानां च रुदितस्त-
नपानहास्यत्रासादीनां प्रवृत्तिलक्षणोत्पत्तिः। कर्मसा-
मान्ये फलविशेषो मेधाक्वचित्क्वचित्कर्मण्यमेधा च
जायते भूतानां च समदर्शने प्रियप्रायत्वमतएवानु-
मीयते॥ शब्दप्रमाणेन स्पष्टयति धर्मद्वारे सावधानैः
व्यपगता विनिर्गता भयरागद्वेषलोभमोहमाना येषान्तैः
ब्रह्मचर्ये तत्परैः यथार्थवक्तृभिः कर्मज्ञैर्न उपहता
नष्टाः सत्वबुद्धिप्रचारा येषान्तैः प्राचीनतरैर्दिव्य-
दृष्टिभिर्महर्षिभिर्दृष्टः शिष्येभ्य उपदिष्टश्च पुनर्जन्मा-
स्ति इति हेतोर्निश्चिनुयात् प्रत्यक्षप्रमाणं दर्शयति
एवं शब्दप्रमाणवत् प्रत्यक्षमपि पुनर्जन्म उपलभ्यते।
तदाह मातापित्रोर्विसदृशानि तुल्यगुणसंभवानि
चापत्यानि जायन्ते के च ते गुणा इत्यपेक्षाया-

माह वर्णस्वराकृतिसत्त्वबुद्धिभाग्यविशेषाः उच्च-
नीचकुले जन्मदास्यम् ऐश्वर्य्यं सुखं दुःखं आयुषो
वैषम्यं च तान्यपत्यान्यायुरस्मिन् जन्मनि अकृतस्य
कर्मणः फलस्य प्राप्तिरनेन पूर्वजन्मकृतकर्मण
फलप्राप्तिरित्यनुमीयते।यस्माद्बीजम्विनाङ्कुरस्यासं-
भवः। अशिक्षितानां शिक्षारहितानां सद्यो जातानां
बालानां रोदनस्तनपानहास्यत्रासादीनां प्रवृत्तिहेतु-
कोत्पत्तिः कर्मसामान्ये फलविशेषो जायते।क्वचित्क-
र्मणि मेधा क्वचित्कर्मण्यमेधा च जायते। भूतानां
प्राणिनां समदर्शने प्रियाप्रियत्वञ्च जायते॥ इत्य-
नेन पुनर्जन्म भवतीत्यनुमीयते ॥९॥ चार्व्वाकाणां
प्रलापान्तरमुद्भावयति तत्त्वानाम्मेलनेनैव चिदुत्पत्तिः
प्रजायते। ताम्बूलखदिरादीनाम्मेलनाद्रक्तत्वादिवत्॥
॥ १० ॥ आदिशब्देन चूर्णं पूगीफलम् ॥ १० ॥
युक्त्या तद्युक्तिं खण्डयति चाक्षुषत्वादिराहित्याच्छङ्-
कितादिसमन्वयात् ॥ नानुमानम्प्रमा चास्य सह-
चाराग्रहात्तथा ॥ ११ ॥ गर्भे तत्त्वानाम्मेलनेन चि-
दुत्पत्तिः केनापि न दृश्यते तस्मादस्य न चाक्षुषत्वं
सहचाराग्रहात् शङ्कितादिसमन्वयात् नानुमानं
प्रमाणम् ॥ ११ ॥ चार्व्वाकाणां प्रलापान्तरमुद्भावयति
ईश्वरस्त्वपरो नास्ति राजैव परमेश्वरः। मोक्षो न

मरणाद्भिन्न इहैव स्वर्गदुर्गती ॥ १२ ॥ स्वर्गदुर्गती स्वर्गनरकौ सुखं स्वर्गो दुःखमेव नरकः ॥ १२ ॥ युक्त्या तत्प्रलापं खण्डयति मूढ नास्ति परमेश्वर इति वद मेव यस्मादस्मिन् वाक्ये मानन्नैव ॥१३॥ नृपादन्यः परमेश्वरो नास्तीति मा वद ॥ १३ ॥ अप्रतियोग्यभावस्य ज्ञानं यस्मान्न जायते तस्मादिदमलीकं हि वन्ध्यापुत्रखपुष्पवत् ॥ १४ ॥ यस्माद्धेतोरप्रतियोगिनः प्रतियोगिरहितस्याभावस्य ज्ञानं न जायते वस्तु विना अभावो नास्ति अभावम्विना तज्ज्ञानासंभवः तस्मात् ईश्वर इत्यप्यपास्तम् ईश्वरस्य सर्व्वप्रमाणसिद्धत्वात् दृष्टान्तासम्भवात् वाक्यमात्रे द्रावितदृष्टान्तवलेनेश्वरानास्तित्वासिद्धौ विपरितस्यापि सम्भवात्तेन तत्सिद्धौ विपरितस्यापि सम्भवात्तेनैतत् सिद्धेश्वरस्त्वपरो नास्तीति वाक्यमलीकम् वन्ध्यापुत्रखपुष्पवत् ॥ १४ ॥ ननु यथा गगनकुसुमादीनामसत्वेऽपि गगनकुसुमन्नास्तीत्यादिवाक्यात् वस्तुशून्यशब्दानुपातिज्ञानञ्जायते तथाऽत्रापि यद्यस्ति ईश्वरस्तर्हि कुतो न दृश्यते इत्यत आह दूरादनुपलब्धिस्तु सौक्ष्म्यादीन्द्रियघाततः व्यवधानादभिभवात्मनः सोप्यनवस्थितेः ॥ १५ ॥ अनुद्भवाच्च सामीप्यात् समानाभिहृतैरपि योगिनाम-

वगम्यस्य विश्वेशस्य हृदा सदा ॥ १६ ॥ योगिनां हृदा मनसा सदा अवगम्यस्य योगजसान्निकर्षबलेन नियतप्रत्यक्षीकृतस्य परमेश्वरस्य अनुपलब्धिस्तु प्रत्यक्षाविषयत्वन्त्वस्माकन्न पुनः सर्वेषां कुत इत्यपेक्षायां दृष्टान्तपूर्वकमाह । दूरस्वरूपात् यथा वियति विहङ्गमाः सूक्ष्मत्वात् यथा परमाणवः चक्षुरादि-विनाशात् यथा स्थूलविषयाः भित्तिकाद्या-वरणात् यथा राजदारादयः अभिभवात् एकेनापर-स्यावरणात् यथा दिवसे नक्षत्रादयः मनसो विष-यान्तरसंयोगात् यथा चक्षुःसन्निकृष्टाविषयाः॥१५॥ अनुद्भवात् यथा दुग्धादिस्थदध्यादीनि सामीप्यात् यथा लोचनस्था अञ्जनादयः समानेन सदृशेन अभिहतेःआच्छादनात् यथा तोयराशिपतितास्तोय-विन्दवश्च नोपलभ्यन्ते तथा वासनादिरूपदोष कलापकवलितत्वात् अस्माभिरपि भगवान्नोपलभ्यते इति भावः ॥ १६ ॥ यद्यन्येषान्तु वचसा जन्मा-देर्जायते मतिरीश्वरोऽस्तीति वचनं कर्णशूला-यते कथम् ॥ १७ ॥ अन्येषामपि वचसा स्वजन्मादीनां ज्ञानं यदि जायते तर्हि बहवः प्रामाणिका ईश्वरो-ऽस्तीति कथयन्ति तादृशवचनं कथं कर्णशूलायते को विशेषश्चानयोर्यदेकं प्रामाणमपरमप्रमाणम् ॥१७॥

निर्नियामको नियमो न दृश्यते श्रुयते क्वापि ॥
तस्मात्कोऽपि नियन्ता वर्त्तते खलु विश्वचक्रस्य॥१८॥
शीतोष्णादिः सनियामकः नियमत्वात् । राजादिकृत-
कार्यनियमवत् ॥ १८ ॥ अस्तित्वत्काव्यवच्चैव दिशा-
वच्चान्तरक्षवत् ॥ सन्देहादेश्च राहित्याच्चार्वाक-
मतवन्नहि ॥ १६ ॥ यथा तत्त्वानां मेलनेन चिदु-
त्पत्तिश्चार्वाकस्य शंकितानुमानं तत्तुल्यमिदमनुमा-
नन्न यतो व्यभिचाररहितात्यादवत् ॥ १६ ॥
ननु स्वभाव एव नियामकः कर्त्ता चेत्यत्त आह ॥
कादाचित्कं च यद्यद्धि तत्तत्सर्वं सकर्तृकम् ॥ कादा-
चित्कत्वरूपत्वात्स्वभावोऽपि सकर्तृकः ॥ २० ॥
यद्यत् कादाचित्कं तत्तत्सकर्तृकं घटादिवत् तर्हि
कादाचित्कत्वरूपत्वात्स्वभावोऽपि सकर्तृकः ॥ २० ॥
यदि स्यात्सर्वदा स्थायी स्वभावो भवतां मते । सर्व-
कालेषु शीतादिदर्शनस्यापि सम्भवः ॥ २१ ॥ अथ-
स्भावः। कारणस्य स्थायित्वे कार्यस्य स्थायित्वं दुर्वा-
रमेवेति ॥ २१ ॥ यद्येवन्तर्ह्यधीशस्यापीशः कोऽपि न
संशयः। एवन्नैव च वक्तव्यं यतो राजकुलालवत्॥२२॥
यद्येवं तर्हि कादाचित्कतया ईश्वरान्तरापेक्षा तस्या-
पीश्वरान्तरस्य तथा एवमीश्वरपरम्परापि को विशेषो-
ऽस्यस्य । स्वभावादिति। उत्तरयति । एवमीश्वरो नाना

नवक्तव्यमिदमिति शेषः॥ दृष्टान्तयते। यथा एक एव राजा कुलालश्च कालान्तरानुसारेण विविधकार्यजातंसम्पादयति तथा ईश्वरोऽपि ॥ २२ ॥ युक्त्यन्तरेण पुनस्स्वभावं खण्डयति ॥ स्वभावसाधने मूढ प्रमाणं नैव दृश्यते सन्निकर्षस्य राहित्यात्सहचाराद्यसंभवात् ॥ २३ ॥ सन्निकर्षस्य चक्षुः संयोगादेराहित्यादेरभावात्तत्र प्रत्यक्षमसम्भव इति भावः ॥ क्षित्यङ्कुरादिकं स्वभावजन्यङ्कार्यत्वात् सलिलशैत्यादिवत् इत्यत आह। सहचारस्यान्वयव्यतिरेकयादेरसम्भवादभावात् तस्यासत्त्वेनानिश्चयात् नानुमानम्प्रमाणमिति भावः। अन्वयसहचारो हि तत्सत्त्वे तत्सत्ताव्यतिरेकी च तदसत्त्वे तदसत्ता।तथा च सर्वस्यैव पक्षरूपत्वेन सर्वत्रैव साध्यसन्देहात् सहचारानिश्चयेन व्याप्तिनिश्चयासंभवादनुमित्यासम्भव इतिभावः आदिपदात् दृष्टान्तादिपरिग्रहीतस्याप्यसम्भवात्॥ २३ ननु क्षित्यङ्कुरादिकं किञ्चिज्जन्यङ्कार्यत्वाद्घटादिवत् इत्यनुमानेन कर्मादिनापि जगदुत्पत्तिःसिद्धिरित्यत आह कर्म्मप्रधानकाला न समर्थाश्चेतनाभावात् ॥ कोऽपि सचेतनकर्त्ता वर्तते खलु विश्वचक्रस्य॥ २४ कर्म्मयागादिजन्यादृष्टम् प्रधानं प्रकृतिः सत्वरजस्तमसां साम्यावस्थाकालः समयः न समर्थाः सृष्टिक-

रण इति भावः। कुतश्चेतनाभावाद्घटादिजडान्तरवत्। चेतनं चैतन्यं लोके कृत्यादेर्ज्ञानसामानाधिकरण्यदर्शनेन चेतनादिभावेष्वेव तस्य कर्तृत्वस्य तर्कसहचारदृष्टान्तादिग्रहात् चेतन एव कर्तृत्वमनुमातुं शक्यते इत्यतो विश्वचक्रस्य कोपि सचेतनः कर्त्ता वर्त्तते नतु जडः। जडादिदेहादिवत् कार्यसम्पादनाय चेतनसहायमपेक्षन्ते। ननु कार्यवैचित्र्यानुरोधेन जगदीश्वरोऽपि नानेत्याशंक्याह ॥ २५ ॥ हेतुनैकेन कार्याणि विचित्राणि कथं वद। वृष्टिवद्दीप्तिवच्चैव स्नानवच्छस्त्रघातवत्॥२६॥ एकेन हेतुना कथं विचित्राणि कार्य्याणि वद इति जिज्ञासायां समाधत्ते वृष्टिवदिति। यथा एकस्या वृष्टेर्वर्षणात् तापनाशो मृदार्द्रताशष्पादिवर्द्धनञ्च यथा एकस्या दीप्तेरालोकात् वर्त्तिकानाशः प्रकोशो दाहादिश्च यथा एकस्मादेव स्नानात् मलक्षयो रोगादिनाशः सुखलाभश्च यथा वा एकस्मादेव शस्त्राघातात् रुधिरपातो दुःखोत्पादः क्षतादिकश्च जायते तथा एकस्मादेवेश्वराज्जगदुत्पाद इति ॥२६॥ अनेककारणमृते कारणोत्पत्तिर्न्न जायते। अस्माकन्नास्ति सन्देहो यत इच्छादिचेश्वरे॥२७॥ अयमेव सिद्धान्तः अत्रास्माकं सन्देहो नास्ति यतः ईश्वरे इच्छादिरस्ति ॥ २७ ॥ ननु क्रियारहिते ब्रह्मणि कथङ्कर्तृत्वसम्भव

इत्यत आह । निष्क्रिये परमेशाने कर्तृशक्तिर्न्न बाधिता। अयस्कान्ते क्रियाशून्ये लौहाकर्षणशक्तिवत्॥ २८॥ निष्क्रिये क्रियारहिते ब्रह्मणि कर्तृशक्तिः कर्तृत्वन्न बाधितानानुभवविरुद्धा यथा निश्चालोप्ययस्कान्तो लौहाकर्षण ञ्जनयति तथा जगदीशोऽपि॥ २८॥ इत्याद्यभिप्राय गर्भं वेदाप्रामाण्यसूचकम्प्रलापान्तरमुद्भावयति मिथ्याफलेन युक्तत्वात्पौनरुक्त्याद्यसङ्गतेः। अशिष्टकर्तृकत्वाच्च वेदः प्रामाणिको नहि ॥२९॥ उत्तरयति । तिथिग्रहणताराद्विव्यभिचाराप्रसङ्गतः। नहि मिथ्याफलैर्युक्तो यज्ञादावयथार्थतः ॥ ३० ॥ वेदो मिथ्याफलैर्न युक्तः कुतः तिथ्यादीनां व्यभिचारस्य अप्रसंगात् ॥ तिथिः शुक्लप्रतिपदादिदर्शान्ता ग्रहणञ्चन्द्रसूर्याद्युपरागः तारा नक्षत्राणि आदिपदाद्द्रव्यशक्त्यादेः । ननु यदि वेदः प्रामाणिकस्तर्हि कथं यज्ञादितो यथार्थफलन्न दृश्यते इत्यत आह यज्ञादाविति। यज्ञादौ अयथार्थतः यथाविध्यनुष्ठानाभावात् न फलसिद्धिरितिभावः ॥३०॥ पौनरुक्त्यादिदोषमपाकरोति ॥ यथार्थबोधनार्थाय पुनरुक्तिर्ज्जगत्प्रभोः। असङ्गतिर्न कुत्रापि वाक्यभेदोऽधिकारतः ॥ ३१ ॥ अधिकारात्पुरुषविशेषस्येति शेषः वाक्यभेदः कर्म्मकाण्डज्ञानकाण्ड प्रशंसनमिति भावः ॥ ३१ ॥ वेदस्याशिष्टं कर्ता इति पूर्वोक्तप्रलापस्यो-

त्तरं करोति ॥ अकारादिहकारान्तवर्णसंकेतबोधकः ।
लौकिकश्चेद्भवेत् मूढ पुनः प्रामाणिकस्तुकः ॥ ३२॥
अयं भावः। वर्णविधानकरणे कोऽपि न क्षमस्तस्य कर्ता
यदि लौकिकः स्यात् तर्हि प्रामाणिकस्तुकः कोऽपिने-
त्यर्थः ३२ ॥ सौलभ्याय चार्वाकादिसिद्धात्मस्वरूप-
मुद्धाट्य उत्तरोत्तरं क्रमादनुभवं दर्शयन्नात्मस्वरूपनि-
रूपयिष्यन् प्रथमं पुत्रात्मवादिमतमाह । खिन्नोऽहं
पुत्रखेदेन पुत्रशोकेन शोकभाक् ॥ इत्याद्यनुभवादा-
त्मा पुत्र एव न चापरः। देहात्मवादिमतमाह ।
एवं मा वद रेमूढ यत उक्तिरयुक्तिका ॥ पुत्रो
मातुरात्मा वा पितुरात्मा वा उभयोरात्मा नाद्यः ।
पुत्रजन्मानन्तरं मातुर्मृतेरदर्शनात् ॥ न द्वितीयः
निषकानन्तरं पितुः पंचत्वादर्शनात् । तृतीयोऽपि न
उभयोर्मरणाभावात् अतस्त्वदुक्तिरयुक्तिका ॥ यद्वा
अपुत्रस्यापि जीवनदर्शनात्॥ पुत्र आत्मा न भवति॥
पुत्रं परित्यज्य गृहाद्वहिर्दीप्ताद्वहिर्व्रजेत् ॥ अतः
प्रियतरो देहस्तस्मादात्मा परो नहि ॥३ ॥ दुर्बलोऽ-
हमहं पीनो दीर्घश्चाहमहं लघुः। इत्याद्यनुभवाल्लोके
देहआत्मा न चापरः ॥ ४ ॥ आदिपदाच्छ्यामोऽहं
गौर इत्याद्यनुभवस्य संग्रहः ॥४ ॥ इंद्रियात्मवादि-
चार्वाकमतमाह ॥ अपरजडात्मा खान्येवात्मा लो-

कायतिकः कथयत्युतकः ॥५। अभावे तु हृषीकाणां-देहे ज्ञानाद्यसंभवात् ॥ वधिरोऽहमहं काणोऽनुभवादिति नापरः ॥६॥ खानि इन्द्रियाणि लोकायतिकः चार्वाक उत्क उत्कंठितः। हृषीकाणां इन्द्रियाणां नापरःइन्द्रियाण्येवात्मा अपरो न॥६॥ प्राणात्मवादि चार्वाकमतमाह ॥ प्राणाभावे विषयादेश्चलनायोगदर्शनात्। पिपासुरस्म्यनुभवात्प्राण आत्मेति चापरः ॥ ७ ॥ प्राण इति अपरश्चार्वाकः सत्स्वपि शरीरेन्द्रियेषु प्राणाभावे विषयादेरिन्द्रियादेश्चलनायोगदर्शनात् स्वस्वकार्यकारकसामर्थ्याभावात् पिपासुरस्मीत्यनुभवाच्च प्राण एवात्मेत्याह ॥ ७ ॥ मन आत्मवादिचार्वाकमतमाह। प्राणादिसत्वे ज्ञानादौ मनः साहाय्यदर्शनात् ॥ सङ्कल्पवानहम्बोधान्मन आत्मेति चापरः ॥ ८ ॥ प्राणादीनां प्राणेन्द्रियशरीराणां सत्वे वर्त्तमानत्वे ज्ञानादौ ज्ञानेच्छाकृत्यादौ मनः साहाय्यदर्शनात् मनो योगम्विना ज्ञानाद्यनुत्पादात्। अहं सङ्कल्पवानहम्विकल्पवानित्यनुभवाच्च मन एवात्मेति अपर आह इति शेषः ॥८ ॥ बुद्ध्यात्मवादिचार्वाकमतमाह। अभावेषु च कर्तॄणां करणाभावदर्शनात् ॥ अहङ्कर्त्तेत्यनुभवात् बुद्धिरात्मा-न चापर॥ ६ ॥ : कर्तॄणां अध्यवसायानां अभावेषु। कर-

णस्य सङ्कल्पविकल्पात्मकमनसोऽभावदर्शनात् अह-
ङ्कर्त्ता अहम्भोक्तेत्याद्यनुभवाच्च कर्तृत्वादेर्बुद्धिधर्म्म-
त्वादिति भावः बुद्धिरेवात्मा न चापरः ॥ ९ ॥ अज्ञा-
नात्मवादिमतमाह ॥ अज्ञाने बुद्धि विलपादात्मा
ज्ञानम्परेरितः । अहमज्ञोप्यहं ज्ञानीत्यादेरनुभवादपि॥
अज्ञाने सुषुप्तिमूर्च्छापस्मारादौ बुद्धेर्विलपात् । अहं
अज्ञो ज्ञानाभाववान् अहं ज्ञानी ज्ञानवान् । इत्या-
द्यनुभवाच्च अज्ञानं ज्ञानादन्यत्किमपि आत्मा नतु-
ज्ञानस्वरूपः परैस्ताकिककाणादप्राभाकरैरीरितः कथितः
आदिपदात् अहं सुखी अहं दुःखीत्याद्यनुभवस्य
सङ्ग्रहः॥ १०॥ अज्ञानोपहितचिदात्मवादिमतमाह ॥ न
जानाम्यहमात्मानमित्याद्यनुभवाद्विदुः । स्वप्रकाशा-
प्रकाशाभ्यामज्ञानोपाहिताञ्चितम्॥ ११ न॥ जानामीति
अहं आत्मानन्न जानामीति अनुभवात् अयम्भावः।
अहमात्मानन्न जानामीत्यात्माज्ञता एतदेवाज्ञत्वम-
ज्ञानकार्य्यमिति तथा स्वप्रकाशाप्रकाशाभ्यां स्व-
प्रकाशश्चाप्रकाशश्च तौ ताभ्याम् ॥ तथाच सुषुप्त्य-
नन्तरं जाग्रदवस्थायां सुखमहमस्वाप्स मित्या-
दिना सुख स्मरणस्य सिद्धत्वेन सुषुप्ता-
वुत्पन्नस्य सुखस्य साक्षिविरहे जागरे स्मरणा-
संभवात्सलाक्षिकस्यैवोत्तरस्मरणादिति भावः । तच्च

साक्षित्वमात्मन एव धर्मः अतएव तदानीं यदि आत्म स्वप्रकाशो न स्यात्साक्षी न स्यादित्यादिना आत्मनास्वकाशः सिद्ध्यति सच स्वप्रकाशश्चित्त एव धर्म्म इति तस्मात्स्वप्रकाशात् अप्रकाशात्सुषुप्तौ विषयानामस्फुरणात अप्रकाशस्याज्ञानधर्म्मत्वादिति भावः। अज्ञानोपहिताञ्चितिम्विदुरात्मानं भट्टपादानुयायिनं इति शेषः ॥ ११ ॥ शून्यात्मवादिमतमाह। मया किञ्चिन्न विज्ञातम्बोधादित्युत्थितस्य च। सुषुप्तौ बुद्धिनाशाच्च शून्यमात्मान चापरः ॥ ११ ॥ उत्थितस्य सुषुप्त्यनन्तरं प्रवृत्तस्य न मया किञ्चिन्न विज्ञातं सुषुप्ताविति भावः। इति बोधादनुमानात्सुषुप्तौ बुद्धेर्नाशाच्च शून्यमेवात्मा चापर इति माध्यमिकावदन्ति। अयमाशयस्तत्त्वतो, यदि आत्मा सत्त्वं स्यात्तर्हि सुषुप्तावपि विज्ञानता स्यात् एवमात्मा यदि चिद्रूपः स्यात्तर्हि सुषुप्तौ स्वप्रकाशः स्यात् अतएव शून्यमेवात्मेति भावः ॥१२॥ शून्यवादं खण्डयति। इदन्तु निखिलं शून्यन्नास्ति किञ्चिद्यथार्थतः। एवं हि वद मा मूढ तव शून्यन्न सिद्ध्यति ॥ १२ ॥ इदन्निखिलं शून्यं यथार्थतः किञ्चिन्नास्ति हेमूढ एवम्मा वद हि यतस्तव मत इति शेषः। सर्वं शून्यं न सिद्ध्यतीत्यर्थः। तथाहि यदुक्तं सर्वं शून्यं तत्ससाक्षि-

कान्निःसाक्षिकम्वा आद्यश्चेत् अवश्यमेव कश्चिच्छून्य
स्य साक्षी स्वीकर्त्तव्यः ॥ द्वितीयश्चेत्तस्य साक्षि-
शून्यत्वेनासिद्धिरित्युभयथैव शून्यासिद्धिरिति भावः
॥ १३ ॥ यद्यपि चार्वाकादिमतमपास्तं तथापि
अद्वैतमतापसारणं विना निःश्रेयसं दुर्लभमिति
तस्य चापसारणं तद्विज्ञानं विना न संभवति
अतस्तन्मतमुत्थाप्य खण्डयति ॥ १ ॥ चिदानन्द-
मयब्रह्मप्रतिबिम्बसमान्विता, तमो रजः सत्त्व-
गुणाप्रकृतिर्द्विविधा च सा ॥ २॥ सत्त्वशुद्ध्यविशुद्धि-
भ्यां मायाविद्ये च ते मते। मायाबिम्बो वशीकृत्यतां
स्यात्सर्वज्ञ ईश्वरः।अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादने-
कधा ॥ ३ ॥ चिदानन्देति यच्चिदानन्दरूपं ब्रह्म तस्य-
प्रतिबिंबेन प्रतिच्छायया समन्विता युक्ता तमो रजः
सत्त्वगुणाःसत्त्वरजस्तमो गुणानां साम्यावस्थाया सा
प्रकृतिरित्युच्यते सा च द्विविधा द्विप्रकारा भवति।२।स
हेतुकं प्रकारान्तरेण द्वैविध्यमेव दर्शयति।सत्त्वेति सत्त्व-
स्य प्रकाशात्मकस्य गुणस्य शुद्धिः। गुणान्तरेणाकलुषी-
कृतता अविशुद्धिः। गुणान्तरेण कलुषीकृतत्वं ताभ्यां
सत्त्वशुद्ध्याविशुद्धिभ्यां ते च द्विविधे मायाविद्ये माये-
त्यविद्येति च मते संमते विशुद्धसत्त्वप्रधाना सा माया
मलिनसत्त्वप्रधाना विद्येत्यर्थः।यदर्थं मायाविद्ययोर्भेद-

उक्तस्तदिदानीं दर्शयति मायाबिंबःमायायां प्रतिफलितश्चिदात्मा तां मायां वशीकृत्य स्वाधीनीकृत्य वर्त्तमानः सर्वज्ञःसर्वज्ञत्वादिगुणक ईश्वरःस्यात् अविद्यावशगोऽविद्यायां प्रतिबिंबत्वेन स्थितस्तत्परतंत्रस्तु चिदात्मान्यो जीवः स्यात् स च तद्वैचित्र्यात्तस्या अविद्याया उपाधिभूताया वैचित्र्याददविशुद्धितारतम्यादनेकधा अनेकप्रकारो देवतिर्य्यगादिभेदेन विविधो भवतीत्यर्थः ॥ ३ ॥ खंडनमाह प्रतिबिंबस्य दुःखादिः कदाचिन्नोपजायते जीवे दुःखसुखादिस्तु व्याप्तोत्यत्र न संशयः ॥ ४ ॥ अतस्ते प्रतिबिंबोक्तिर्वन्ध्यापुत्रखपुष्पवत् ॥ उत्तरं करोति एवं नैव च वक्तव्यः प्रतिबिंबो हि विम्बवत् ॥५॥ प्रतिबिंबो हि विम्बवत् मनुष्यस्य प्रतिबिंबो मनुष्यवत् मनुष्येतरस्य प्रतिबिंबो मनुष्येतरवत् । अयं भावः । देहादि जडस्तस्मात्तत्प्रतिबिंबोऽपि जडः । ब्रह्म तु चैतन्यं तस्मात्तत्प्रतिबिंबोऽपि चेतनः ॥ ५ पुनः खंडयति, यद्येवं तर्हि दुःखादिनैवजीवेऽपि संभवेत् यतो दुःखादिराहित्यं ब्रह्मणः समुदीरितम् ॥ ६ ॥ पुनः प्रकारान्तरेण खंडयति । युग्महनिस्य विंबस्य प्रतिबिंबो न संभवेत् । निराकारपदार्थस्य प्रतिबिंबः कदापि न ॥ ७ ॥ उत्तरयति ॥ आकाशप्रतिबिंबस्तु दृश्यते श्रूयते यतस्तस्मादलीकं त्वद्वाक्यं

शशशृंगखपुष्पवत् ॥ ८ ॥ गृहाद्यन्तर्वर्तिनोऽन्तरालस्य प्रतिविंबो दर्पणादौ दृश्यते तस्मात्त्वद्वाक्यमलीकम्॥ ८॥ प्रत्युत्तरयति॥ प्रकाशप्रतिविंबं हि भ्रान्त्याकाशस्य मन्यसे। द्रव्यस्य रूपहीनस्य चाक्षुषत्वं न संभवेत् ॥ ९ ॥ गृहादिमध्ये प्रकाशाधिकभूतलादिसर्वाभावो दृश्यते तस्यैव प्रतिविंबः पततिरूपहीनद्रव्यस्य आकाशस्य चाक्षुषत्वं न संभवति अतस्तस्य प्रतिविंबोऽपि न संभवति यदि रूपहीनस्य चाक्षुषत्वं स्वीकुरुषे तर्हि मारुतस्यापि चाक्षुषत्वप्रसंगं स्यात् अतो न रूपहीनस्य चाक्षुषत्वम्। यदि पंचीकरणेन आकाशमपि रूपवन्तं मन्यसे तर्हि साकारत्वात् अस्तु प्रतिविंबपातः ॥ १० ॥ पुनः प्रकारान्तरेण दूषयति भेदहीनपदार्थस्य प्रतिविंबो न संभवेत्। यतो भेदविहीनानां प्रतिविंबो न दृश्यते ॥ ११ ॥ सजातीयविजातीयस्वगतभेदराहितस्य भवता स्वीकृतस्य ब्रह्मणः प्रतिविंबो न संभवेत्। यतः स्वगतादिभेदराहितानां प्रतिविंबो न दृश्यते ॥ ११ ॥ मायाविद्ये मृषाभूते तयोः सत्प्रतिविम्बितम् ॥ इति त्वदुक्तिस्त्वय्येव शोभते नेतरेषु च ॥ १२ ॥ तयोः—मायाविद्ययोः सत्परंब्रह्म ॥ १२ ॥ ननु यथा घटमठाद्यवच्छेदकेनाकाशोऽवच्छेद्यवत्प्रतीयते तन्नाशे तु

शुद्ध एव तथाविद्यारूपावच्छेदकेन ब्रह्मजीवत्वप्रतीयते तन्निवृत्तौ तु शुद्ध एवेत्यत आह ॥ परिच्छेदविहीनत्वाद्भेदशून्यात्त्वसंभवः । अवच्छेद्यस्य वादस्य वन्ध्यापुत्रखपुष्पवत् ॥१॥ परिच्छेदेति देशतः कालतो वस्तुतश्च परिच्छेदशून्यत्वात् । अयं भावः । वस्त्वन्तरं विना परिच्छेद्यपरिच्छेदकश्च न भवति यतस्त्वन्मते ब्रह्मातिरिक्तं वस्त्वन्तरं नास्ति अतोऽवच्छेद्यावच्छेदकयोरसंभवः । भेदशून्यात् सजातीयविजातीयस्वगतभेदशून्यात् । अयं भावः । भेदं विनाऽवच्छेद्यस्यासंभवः । यद्याकाशे स्वगतभेदोऽस्ति तर्हि घटादिनाऽवच्छेद्यो भवति सजातीयविजातीयभेदं विनाऽवच्छेदकस्याप्यसंभवः । यत आकाशाद्विजातीयो घटादिरवच्छेदको भवति तन्मते ब्रह्मणि भेदो नास्ति अतोऽप्यवच्छेद्यावच्छेदकयोरसंभवः ॥ १ ॥ ननु रज्जुसर्पवदात्मानं जीवं ज्ञात्वा भयं वहेत् । नाहं जीवो ब्रह्माहमिति ज्ञात्वा निर्भयो भवेदिति विवर्त्तवादाभिप्रायेणाशंक्याह । सर्पे सर्पभ्रमो नास्ति स्वर्णे स्वर्णभ्रमोऽपि च तस्मादेकपदार्थत्वाद्विवर्तस्तु न संभवेत् ॥ २ ॥ यतोऽन्यस्मिन्नन्याभासो भ्रमः । अतः सर्पे सर्पभ्रमो नास्ति तथा स्वर्णे स्वर्णभ्रमोऽपि तेषां मते ब्रह्मातिरिक्तपदार्थो नास्ति तस्मादेकपदा-

र्थत्वाद्विवर्तो न संभवेत्। तुरवधारणे विपरीतं वर्तनं विवर्त्तः अतात्त्विकोऽन्यथाभाव इति यावत्। चाच्छ्रुतिविरोधादपि न विवर्तस्तथाच श्रुतिः—सतः सञ्जायते अयं भावः। ब्रह्मणो भ्रमविषयीभूतम् सन्न जायते ॥ २ ॥ ननु जीवादयः षडनादयो विवेके सति शान्ता भवन्ति घटोत्पत्तौ सत्यां तत्प्रागभाववत् अयं भावः।ज्ञाते तत्वेकः संसार इत्यत आह। अनादि भावरूपस्य विनाशस्याप्यसंभवात्। अनादिशान्तवादोऽपि मूढोन्मत्तप्रलापवत् ॥ ३ ॥ अयं भावः। अनाद्यभावस्य विनाशो दृश्यते श्रूयते च नतु भावपदार्थानामतो मूढोन्मत्तप्रलापवद् नादिशान्तवादः ॥ ३ ॥ ननु ब्रह्म नास्ति न जानामीति व्यवहारो यदाश्रितः अज्ञानमपि तदाश्रितम् सच जीवाश्रितः। अज्ञानमपि तदाश्रितमयं भावः ॥ अज्ञानदशायां ब्रह्मणोऽपरपर्यायो जीवः, ज्ञानदशायां तु ब्रह्मैवेत्यत आह ॥ एकस्य बंधो मोक्षोऽपि युगपन्नैव संभवेत् ॥ तस्मान्न जीव एकः स्याच्छास्त्रेऽनेकत्वदर्शनात् ॥ ४ ॥ एकस्य पुरुषस्यैकस्मिन्काले बंधो मोक्षोऽपि न संभवेत् तस्माज्जीव एको न स्यात् शास्त्रेऽनेकत्वदर्शनाच्च॥ तथाहि ब्रह्मसूत्रम् ॥ अंशो नानाव्यपदेशात् ॥ श्रुतिरपि। नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो

विदधाति कामान् ॥ ननु इन्द्रो मायाभिः पुरुरूप ईयते॥ इति श्रुत्या मायाभिर्नानात्वं ननु वास्तवमिति चेन्न। यतः श्रुत्यभिप्रायोऽवतारपरस्तथाच तापिनीय श्रुतिः। यो ह वै श्रीरामचंद्रः स भगवान् ये मत्स्यकूर्माद्यवतारा: भूर्भुवः स्वस्तस्मै वै नमोनमः। सनत्कुमारसंहितायामपि ॥ मत्स्यकूर्मवराहादिरूपधारिणमव्ययम्। अत एव जीवेश्वयोर्भेदं मनसि निधाय तयोः पृथक् पृथक् लक्षणं ब्रह्मसूत्रे व्यासेन निरूपितम्। तथा च जन्माद्यस्य यत इतीश्वरलक्षणम्। जगद्व्यापारवर्जमिति मुक्त जीवलक्षणम्। अत एव, द्वा सुपर्णौ सयुजा सखाया समानं वृक्षं परिषस्व जाते। तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीति। अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः॥४॥ ननु जगतो जन्मादिजीवस्य च। बन्धमोक्षादिव्यवहारत एव ननु परमार्थतः ज्ञान विषयीभूतं मिथ्या दृश्यत्वात् शुक्तिकारजतवदित्यत आह ॥ प्रत्यक्षादिविरुद्धत्वाजज्जातस्य न संभवः॥ अत्रादि शब्देनानुमानशब्दयोः संग्रहः प्रत्यक्षानुमानशब्दविरुद्धत्वादजातवादस्य न संभवोऽयं भावः। यतो जन्मादि दृश्यतेऽतः प्रत्यक्षविरुद्धत्वम्।

सहाचाराद्यभावादनुमानविरुद्धत्वम् । ज्ञानविषयीभूतं मिथ्याहृश्यत्वात् शुक्तिकारजतवत् ॥ अत्र सत्प्रतिपक्षः यद्यद्ज्ञानविषयीभूतं तत्तत्सत्यं दृश्यत्वात्समुद्रादिवत् श्रुत्यादिषु जन्मादिश्रवणाच्छब्दविरुद्धत्वम्। तथाहि जन्माद्यस्य यत इति सूत्रम्। यो ब्रह्माणं विदधाति पूर्वं यतो वा इमानि जायन्ते द्यावाभूमिं जनयन्देव एकस्तस्मादात्मन आकाशं संभूतः प्रजापतिश्चरति गर्भेऽन्तरजायमानो बहुधा व्यजायत इत्यादि श्रुतयश्च। ननु सर्वमनिर्वचनीयमित्यत आह ॥ निर्वचनीयरूपत्वादनिर्वाच्यस्तथैव च ॥ ५॥ अनिर्वचनीयवादोऽपि न यतः सोपि निर्वनीयरूपः॥ १ ॥ ननु अप्रामाण्यं प्रमाणस्य प्रमाणाभावदर्शनात् । प्रामाण्येऽपि प्रमाणं स्यादनवस्था तदा भवेत् ॥६॥ इति चेन्न। एतद्वाक्यस्याप्यप्रामाण्यापत्तिः प्रमाणरूपत्वात्। प्रमाणस्य सूर्यादिवद्व्यवहाराच्च अयं भावः । यथा सूर्यादिः प्रकाशान्तरं नापेक्षेते तथा प्रमाणमपि प्रमाणान्तरं नापेक्षते । ननु प्रमाणस्य त्रैकाल्यासिद्धेरप्रामाण्यम् ॥ अयं भावः । पूर्वकाले प्रमाणस्यासंभवः यतः प्रमाज्ञानाऽनन्तरं प्रमाणज्ञानं जायते वर्तमानेऽप्यसंभवः प्रमाणप्रमेययोर्युगपज्ज्ञानासंभवात् भविष्येऽपि न प्रमेयज्ञानाऽनन्तरं

प्रमाणज्ञानस्याशक्यत्वात् निष्प्रयोजकत्वाच्च इति चेन्न। यतः चक्षुराद्यन्यतमजन्यज्ञानं प्रत्यक्षादिकम्। ननु जिज्ञासाया अप्रामाण्यं ज्ञाताज्ञातपदार्थयोस्तदप्रवृत्तित्वादिति चेन्न। यतः सामान्यज्ञानाऽनन्तरं विशेषज्ञानस्य ज्ञातुमिच्छाजिज्ञासा।

इति श्रीसीतारामकृपापात्र श्रीसीतारामीय श्रीहरिहरप्रसादविरचिते श्रीरामतत्त्वभास्करे पूर्वार्द्धे संपूर्णम्।

इतिश्रीअयोध्याशृङ्गारभवननिवासिना श्रीमद्भगवन्नारायण-
वंशोद्भव वैष्णव पं० रामनारायणदासेन संशोधितं
श्रीरामतत्त्वभास्करे पूर्वार्द्ध समाप्तम्।